International Journal of Sanskrit Research 2021; 7(6): 83-90

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 83-90
© 2021 IJSR
www.anantaajournal.com
Received: 17-09-2021
Accepted: 20-10-2021

**Santanu Nayek**
Research Scholar, Ramakrishna Mission Vivekananda Educational and Research Institute, Belur Math, Howrah, West Bengal, India

**Corresponding Author:**
**Santanu Nayek**
Research Scholar, Ramakrishna Mission Vivekananda Educational and Research Institute, Belur Math, Howrah, West Bengal, India

# कालिदासकृतस्य रघुवंशमहाकाव्यस्य प्रथमद्वितीयसर्गयोः मत्वर्थविमर्शः।

**शान्तनुनायेकः**

## सारांशः

प्रबन्धे अस्मिन् अहं कालिदासेन कृतस्य रघुवंशमहाकाव्यस्य प्रथमद्वितीयसर्गयोः विराजमानानां मत्वर्थीयशब्दानां विषये आलोचनं कृतम् । मतुबादीनां हि सप्त अर्थाः। भूमा, निन्दा, प्रशंसा, नित्ययोगः, अतिशायनम्, संसर्गः अस्तिविवक्षा च इति। तत्वबोधिनीकारमते तु षडेव अर्थाः मतुबादीनाम् । तेन अस्तिविवक्षायाः मत्वर्थत्वं नैव स्वीकृतम् । ये हि शब्दाः रघुवंशस्य प्रथमद्वितीयसर्गस्थाः मया व्याख्याताः ते भवन्ति शुद्धिमति, अर्णवः, कलत्रवन्तम्, मनस्विन्या, दन्तिनः, भक्तिमती, आस्वादवद्भिः, दुष्टसत्वान्, पार्श्वद्रुमाः, पयस्विनीम्, केसरिणम्, सानुमतः, गिरिशप्रभावात्, स्वस्तिमती, ऊर्जस्वलम्, प्रस्रविणीम्, वत्सलः इति ।

## भूमिका

कालिदासः भारतीयवाङ्मये विशिष्टे स्थाने विराजते । तस्य कृतयः नैकाः सन्ति । तेन द्वे महाकाव्ये विरचिते रघुवंशकुमारसम्भवाख्ये । ते च लघुत्रय्याम् अन्तर्भवतः। अनयोः भाषा शैली च सुमधुरा हृद्या च वर्तते। एतद्यतिरिक्तं तेन नाटकानि खण्डकाव्यानि च विरचितानि । नाटकानि च तस्य अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रं च । द्वे च तस्य खण्डकाव्ये मेघदूत-ऋतुसंहाराख्ये । कालिदासस्य समयविषये रामचन्द्रझामहाभागस्य मतं यत् ईसवीयपूर्वद्वितीयशतकात् ईसवीयसप्तमशतकमध्ये कालिदासस्य समयः भवेत् इति । तस्य देशविषये तु अनेन महाभागेन किमपि न उक्तम् । एतत् सर्वं तेन स्वस्मिन् ग्रन्थे [1] उल्लिखितम् ।

[1] र.व. पृ.5-6

कालिदासस्य रघुवंशाख्यं महाकाव्यं पञ्चसु महाकाव्येषु श्रेष्ठम् इति मम मतम् । तत्र ऊनविंशतिः सर्गाः विलसन्ति । प्रत्येकस्मिन् सर्गे वर्तन्ते बहवः श्लोकाः। तत्र च विराजन्ते मत्वर्थीयशब्दाः। प्रश्नः भवति के तावत् मत्वर्थीयशब्दाः इति । वैयाकरणाः जानीयुः के मत्वर्थीयशब्दाः इति । पाणिनिना एकं सूत्रं विरचितं यस्य नाम अस्ति 'तदस्यास्त्यस्मिन्निति मतुप्' [2] इति । अस्य सूत्रस्य अर्थः तत् अस्य अस्ति, तत् अस्मिन् अस्ति इति वा अर्थे मतुप्रथ्ययः स्यात् इति । अतः मतुपः अर्थः तदस्यास्ति, तदस्मिन् वास्ति । अनयोः अर्थयोः न केवलं मतुप्रत्ययः अपि तु इनिठनादिप्रत्ययाः अपि भवन्ति । मतुबादीनां यौ अर्थौ मया प्रोक्तौ तौ तस्य साधारणार्थौ । विशेषार्थस्तु तेषां सप्त । तथा च श्लोकवार्तिकम्

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥ [3] इति ।

अधुना अहं कालिदासेन कृतस्य रघुवंशमहाकाव्यस्य प्रथमद्वितीयसर्गयोः विराजमानमत्वर्थीयशब्दानां व्याख्यानं कर्तुं मन्दमतिः प्रयते । अतः विषयस्य नाम मया 'कालिदासकृतस्य रघुवंशमहाकाव्यस्य प्रथमद्वितीयसर्गयोः मत्वर्थविमर्शः' इति प्रदत्तम् । कालिदासेन कृतं कालिदासकृतम्, तस्य कालिदासकृतस्य इति । रघूणां वंशः इति रघुवंशः, तम् अधिकृत्य कृतं काव्यम् रघुवंशम् इति । महत् च तत् काव्यं च इति महाकाव्यम् । रघुवंशं च तत् महाकाव्यं च इति रघुवंशमहाकाव्यम्, तस्य रघुवंशमहाकाव्यस्य इति । प्रथमः च द्वितीयः च प्रथमद्वितीयौ । प्रथमद्वितीयौ च सर्गौ च इति प्रथमद्वितीयसर्गौ, तयोः इति प्रथमद्वितीयसर्गयोः। मतोः अर्थः मत्वर्थः, तस्य विमर्शः इति मत्वर्थविमर्शः। मतु इति पदेन मतुप्रत्ययस्य तदादीनां च प्रत्ययानां गहणं क्रियते ।

**शुद्धिमति** [4]

शब्दः अयं रघुवंशस्थे प्रथमसर्गे विराजते । मत्वर्थीयः च अयम् । शुद्धिः अस्य अस्ति इति शुद्धिमान् । तस्मिन् इति शुद्धिमति । शुद्धिशब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' [5] इति सूत्रेण मतुप्रत्यये पुंसि सप्तम्येकवचने शुद्धिमति इति रूपं भवति । यस्मिन् श्लोके अयं शब्दः पठितः तस्य श्लोकस्य अन्वयः भवति शुद्धिमति तदन्वये शुद्धिमत्तरः दिलीपः इति क्षीरनिधौ इन्दुः इव प्रसूतः इति । एतेन ज्ञातं यत् तदन्वये इति पदस्य विशेषणभूतं शुद्धिमति इति पदम् । तस्य अन्वयः तदन्वयः, तस्मिन् । तस्य इत्यस्य अर्थः मनोः इति । अन्वयस्य च वंशार्थत्वम् । अस्मिन् श्लोके दिलीपस्य प्रशंसा क्रियते । दिलीपः च मनोः वंशे जातः अतः मनोः वंशः अपि प्रशंसार्हः। मनोः वंशस्य प्रशंसार्थं शुद्धिमति इति विशेषणं दत्तम् । अतः वक्तुं शक्यते यत् अत्र मतुप्रत्ययः प्रशंसार्थे प्रयुक्तः कालिदासेन ।

अत्र एव शुद्धिमत्तरः इति शब्दः अपि पठितः। अस्मिन् शब्दे अतिशयार्थे तरप्रत्ययः प्रयुक्तः। न तु मतुप्रत्ययस्य अतिशयार्थत्वम्, तरप्रत्ययेन तस्य उक्तत्वात्। मतुप्रत्ययस्य तु प्रशंसा एव अर्थः।

**अर्णवः** [6]

अर्णवशब्दः वप्रत्ययान्तः। तत्र च मत्वर्थः विराजते । अर्णांसि सन्ति अस्मिन् इति अर्णवः। अर्णः जलम्, तानि सन्ति अस्मिन् इति अर्णवः समुद्रः। अर्णश्शब्दात् 'केशाद्वोऽन्यतरस्याम्' [7] इति सूत्रस्थेन 'अर्णसो लोपश्च' इति वार्तिकेन अर्णसः परं वप्रत्यये सकारस्य लोपे प्रथमैकवचने च अर्णवः इति रूपं भवति । अस्य श्लोकस्य अन्वयः भवति भीमकान्तैः नृपगुणैः सः उपजीविनाम् यादोरत्नैः अर्णवः इव अधृष्यः च अभिगम्यः च बभूव इति । अस्य अर्थः अर्णवः यथा यादसः रत्नानां च स्थानम्, अतः अर्णवः अनभिभवनीयः, आश्रयणीयः च भवति तथा दिलीपः अपि

---

[2] अष्टा. 5.2.94

[3] वै.सि.कौ. पृ. 570

[4] र.व. तदन्वये शुद्धिमति....क्षीरनिधाविव॥ 1.12

[5] अष्टा. 5.2.94

[6] र.व. भीमकान्तैर्नृपगुणैः....यादोरत्नैरिवार्णवः॥ 1.16

[7] अष्टा. 5.2.109

अनभिभवनीयः आश्रयणीयः च भवति । तत्र च कारणं दिलीपे नृपगुणाः वर्तन्ते । ते कठोररूपेण कान्तिरूपेण च विद्यन्ते । समुद्रे अर्णवे हि अर्णांसि जलानि बहूनि विद्यन्ते । अतः अत्र बहुत्वात् भूमार्थकत्वं सिद्ध्यति वप्रत्ययस्य । सः च अर्थः मत्वर्थे अन्तर्भवति ।

**कलत्रवन्तम्** [8]

रघुवंशस्य प्रथमसर्गस्य द्वात्रिंशत्तमे श्लोके वर्तते अयं शब्दः। कलत्रवन्तम् इति पदं मत्वर्थीयम् । अस्य शब्दस्य विग्रहः भवति कलत्रे स्तः अस्य, तम् इति । कलत्रशब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' [9] इति सूत्रेण मतुप्प्रत्यये मतुपः मकारस्य च 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' [10] इति सूत्रेण वकारादेशे द्वितीयैकवचने कलत्रवन्तम् इति रूपं भवति । अस्य श्लोकस्य अन्वयः भवति वसुधाधिपः अवरोधे महति अपि मनस्विन्या लक्ष्म्या च आत्मानं कलत्रवन्तम् मेने इति । वसुधाधिपः सः राजा दिलीपः कलत्रवान् आसीत् । तस्य कलत्ररूपेण वर्तते भार्या सुदक्षिणा, राजलक्ष्मीः च । अस्य न अन्यानि कलत्राणि सन्ति । अत्र मतुपः द्वेधा अर्थः भवितुम् अर्हति । अकः अर्थः तावत् प्रशंसा, अपरः च अर्थः संसर्गः इति । अन्तःपुरे अन्याः अपि स्त्रियः वर्तन्ते, तथापि सः सुदक्षिणया राजलक्ष्म्या च एव कलत्रवान् आसीत् एतेन दिलीपस्य प्रशंसा क्रियते, मतुपः च प्रशंसार्थत्वं गम्यते । अथवा सुदक्षिणया, राजलक्ष्म्या च सह दिलीपस्य स्वस्वामीभावंसम्बन्धः वर्तते । सम्बन्धः नाम संसर्गः। यथा संयोगसमवायादयः सम्बन्धः तथा स्वस्वामीभावः अपि सम्बन्धः। अतः अत्र संसर्गार्थत्वं विद्यते ।

**मनस्विन्या** [11]

मनस्विन्या इति पदम् अपि तस्मिन् एव श्लोके विराजते यत्र कलत्रवन्तम् इति शब्दः पठितः। इदम् अपि पदं मत्वर्थीयम् । मनः अस्य अस्ति इति विग्रहे मनश्शब्दात् 'अस्मायामेधास्रजो विनिः [12], इति सूत्रेण विनिप्रत्यये, स्त्रीत्वविवक्षायां 'ऋन्नेभ्यो ङीप'[13] इति ङीपि, तृतीयैकवचने च मनस्विन्या इति रूपं भवति । अयं शब्दः यस्मिन् श्लोके पठितः तस्य श्लोकस्य व्याख्यानं मया पूर्वम् एव कृतम् अतः पुनः न उच्यते । मनस्विनीशब्देन दिलपपत्नी सुदक्षिणा विवक्ष्यते । मनस्विनीपदेन सुदक्षिणायाः च प्रशंसा क्रियते। सुदक्षिणायाः हि मनः प्रशस्तम् आसीत् अतः सा मनस्विनी इति कथ्यते । एतेन ज्ञातं मत्वर्थेषु अत्र विनिप्रत्ययस्य प्रशंसार्थम् अस्ति ।

**दन्तिनः** [14]

प्रथमसर्गे विराजमानः अयं शब्दः मत्वर्थीयः। मतुपः अर्थेषु कः अर्थः अत्र विद्यते तस्य एव व्याख्यानम् अत्र क्रियते । दन्तीपदस्य गजः इति अर्थः। दन्तौ अस्य स्तः, तस्य इति विग्रहे दन्तिनः इति पदं भवति। दन्तशब्दात् 'अत इनिठनौ' [15] इति सूत्रेण इनिप्रत्यये पुंसि षष्ठ्येकवचने च दन्तिनः इति रूपं सिद्ध्यति । अस्य श्लोकस्य अन्वयः भवति हे भगवन्, मे अन्त्यम् ऋणम् अनिर्वाणस्य दन्तिनः अरुन्तुदम् आलानम् इव असह्यपीडम् अवेहि इति । दिलीपः वशिष्ठं वदति यत् तस्य पैतृकम् ऋणम् असह्यपीडं भवति, यथा दन्तिनः बन्धनस्तम्भः मर्मस्पृक् भवति इति अस्य श्लोकस्य अर्थः। अत्र इनिप्रत्ययेन दन्तिनः प्रशंसा क्रियते । दन्तयोः प्रशस्ततत्वात् एव हि गजः दन्ती इति कथ्यते। उक्तं च शब्दकल्पद्रुमे 'प्रशस्तौ दन्तौ स्तः अस्य' [16] इति । एतेन अत्र इनिप्रत्ययस्य प्रशंसार्थत्वं सिद्धम् ।

---

[8] र.व. कलत्रवन्तमात्मान....वसुधाधिपः॥ 1.32

[9] अष्टा. 5.2.94

[10] अष्टा. 8.2.9

[11] र.व. कलत्रवन्तमात्मान....वसुधाधिपः॥ 1.32

[12] अष्टा. 5.2.121

[13] अष्टा. 4.1.5

[14] र.व. असह्यपीडं....दन्तिनः॥ 1.71

[15] अष्टा. 5.2.115

[16] श.क.द्रु. पृ.684

**भक्तिमती**[17]

रघुवंशस्य प्रथमसर्गस्य नवतितमे श्लोके पठितः अयं शब्दः। मतुप्प्रत्ययान्तम् इदं पदम्, अतः मत्वर्थीयं च । भक्ति अस्याः अस्ति इति च अस्य पदस्य विग्रहः। भक्ति शब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' [18] इति सूत्रेण मतुप्प्रत्यये, स्त्रीत्वविवक्षायां 'उगितश्च' [19] इति ङीपि, प्रथमैकवचने भक्तिमती इति रूपं सिद्ध्यति । अस्य श्लोकस्य अन्वयः भवति वधूः भक्तिमती प्रयता सती अर्चिताम् एनां प्रातः आ तपोवनात् अन्वेतु, सायम् अपि प्रत्युद्व्रजेत् इति । वसिष्ठः अत्र नन्दिन्याः सन्तोषाय सुदक्षिणया किं कर्तव्यं तत् उपदिशति । भक्तिमती पदेन अत्र सुदक्षिणा बोध्यते । अनेन पदेन सुदक्षिणायाः प्रशंसा क्रियते । तेन मतुपः प्रशंसार्थत्वम् इति सिद्धं भवति ।

**आस्वादवद्भिः**[20]

कालिदासकृतस्य रघुवंशस्य द्वितीयसर्गस्य पञ्चमे श्लोके विराजते अयं शब्दः। सः च मत्वर्थीयः वर्तते । मतुप्प्रत्ययान्तं च इदं रूपम् । आस्वादः एषां अस्ति, तैः इति विग्रहे आस्वादवद्भिः इति भवति । आस्वादशब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' [21] इति सूत्रेण मतुप्प्रत्यये, 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' [22] इति सूत्रेण मतुपः मकारस्य वकारे, तृतीयाबहुवचने आस्वादवद्भिः इति रूपं सिद्ध्यति । अस्य श्लोकस्य अन्वयः भवति सम्राट् सः राजा आस्वादवद्भिः तृणानां कवलैः कण्डूयनैः दंशनिवारणैः अव्याहतैः स्वैरगतैः तस्याः समाराधनतत्परः अभूत् इति । अस्मिन् श्लोके दिलीपेन नन्दिन्याः सेवा कथं क्रियते तद् उच्यते । कवलैः इति पदस्य विशेषणम् इदम् आस्वादवद्भिः इति पदम् । कवलशब्दस्य अर्थः ग्रासः। मल्लिनाथेन आस्वादवद्भिः इति पदस्य 'रसवद्भिः' [23] इति अर्थः प्रोक्तः। भूमेः जलप्राप्तेः तृणानां कवलाः नित्यं रसवन्तः भवन्ति । अतः वक्तुं शक्यते यत् आस्वादशब्दात् मतुप्प्रत्ययः नित्ययोगे अर्थे प्रयुक्तः कालिदासेन। नित्ययोगरूपार्थः च मत्वर्थः।

**दुष्टसत्वान्**[24]

रघुवंशस्य द्वितीये सर्गे वर्तते अयं शब्दः। दुष्टसत्त्वशब्दमध्ये पठितः सत्त्वशब्दः मत्वर्थीयः वर्तते । सत्त्वम् अस्ति एषाम् इति सत्त्वाः, दुष्टाः च ते सत्त्वाः च दुष्टसत्त्वाः, तान् इति दुष्टसत्तवान् । सत्त्वशब्दस्य अन्ते अच्प्रत्ययः विराजते । सः च प्रत्ययः मत्वर्थीयः। किं नाम सत्त्वम् इति चेत् उच्यते सतः भावः सत्त्वम् इति । सत्त्वशब्दात् 'अर्शआदिभ्योऽच्' [25] इति सूत्रेण अच्प्रत्यये समासादिकार्ये कृते द्वितीयाबहुवचने दुष्टसत्त्वान् इति रूपं भवति । अस्य श्लोकस्य अन्वयः भवति लताप्रतानोद्ग्रथितैः केशैः सः अधिज्यधन्वा मुनिहोमधेनोः रक्षापदेशात् वन्यान् दुष्टसत्त्वान् विनेष्यन् इव दावं विचचार इति । अस्मिन् श्लोके राजा दिलीपः कथं वनं विचरति तस्य वर्णनं कृतम् । राजा हि वन्यान् दुष्टसत्त्वान् विनेष्यन् इव वनं विचचार । राजा दुष्टसत्त्वानां विनाशं करोति, अतः दुष्टसत्त्वानां निन्दार्थत्वं गम्यते । तेन च अच्प्रत्ययस्य निन्दार्थत्वं विद्यते ।

**पार्श्वद्रुमाः**[26]

द्वितीयसर्गे वर्तते अयं शब्दः। अस्मिन् शब्दे पठितः द्रुमशब्दः मत्वर्थीयः। अतः पार्श्वद्रुमशब्दस्य व्याख्यानं क्रियते । द्रुः विद्यते एषां ते द्रुमाः, पार्श्वयोः द्रुमाः पार्श्वद्रुमाः इति अस्य पदस्य विग्रहः। द्रुपदस्य वृक्षः इति अर्थः, उक्तं च शब्दकल्पद्रुमे 'द्रवति ऊर्द्धं गच्छति' [27] इति । द्रुशब्दात् 'द्युद्रुभ्यां मः' [28] इति सूत्रेण

[17] र.व. वधूर्भक्तिमती....प्रत्युद्व्रजेदपि॥ 1.90

[18] अष्टा. 5.2.94

[19] अष्टा. 4.1.6

[20] र.व. आस्वादवद्भिः....समाराधनतत्परोऽभूत्॥ 2.5

[21] अष्टा. 5.2.94

[22] अष्टा. 8.2.9

[23] र.व. पृ.29

[24] र.व. लताप्रतानोद्ग्रथितैः....दुष्टसत्त्वान्॥ 2.8

[25] अष्टा. 5.2.127

[26] र.व. विसृष्टपार्श्वानुचरस्य....वयसां विरावैः॥ 2.9

[27] श.क.द्रु. पृ.760

मप्रत्यये पुंसि प्रथमाबहुवचने च द्रुमाः इति रूपं भवति । अत्र द्रुमशब्दस्य अपि वृक्षः इत्यर्थः। एतस्मात् कारणात् अत्र द्रुशब्दस्य न वृक्षार्थत्वम् अपि तु समुदाये वृत्ताः शब्दाः अवयवेषु अपि वर्तन्ते इति न्यायात् द्रुशब्दस्य अत्र शाखा इति अर्थः गम्यते । द्रुद्रुमयोः अवयवावयवीभावसम्बन्धः वर्तते । द्रुमस्य वृक्षस्य हि द्रुः शाखा अवयवम्, तथैव शाखायाः वृक्षः अवयवी । अवयवावयविनोः च समवायसम्बन्धः विद्यते । समवायसम्बन्धात् अत्र मप्रत्ययस्य संसर्गार्थत्वं गम्यते । सः च अर्थः मत्वादीनां प्रत्ययानां सप्तसु अर्थेषु अन्तर्भवति ।

**पयस्विनीम्** [29]

द्वितीयसर्गस्य एकविंशतितमे श्लोके विराजते अयं शब्दः। सः च मत्वर्थीयः। अस्य अन्ते च विनिप्रत्ययः विराजते । प्रशस्तं पयः अस्याः अस्ति, ताम् इति च अस्य विग्रहवाक्यम् । पयश्शब्दात् 'अस्मायामेधास्रजो विनिः' [30] इति सूत्रेण विनिप्रत्यये स्त्रीत्वविवक्षायां 'ऋन्नेभ्यो ङीप्' [31] इति सूत्रेण ङीप्प्रत्यये द्वितीयैकवचने च पयस्विनीम् इति रूपं सिध्यति । अस्य श्लोकस्य अन्वयः भवति साक्षतपात्रहस्ता सुदक्षिणा पयस्विनीं तां प्रदक्षिणीकृत्य प्रणम्य च अस्याः विशालं शृङ्गान्तरं अर्थसिद्धेः द्वारम् इति । एतेन ज्ञायते पयस्विनीम् इति पदं ताम् इति अस्य विशेषणम्। ताम् इति पदेन सा नन्दिनीनामधारिणी धेनुः बोध्यते । तस्याः च पयस्विनीपदेन प्रशंसाक्रियते । तस्याः हि प्रशस्तं पयः विद्यते अतः सा पयस्विनी इति कथ्यते । एतेन विनिप्रत्ययस्य प्रशंसार्थत्वं सिद्धम् । मल्लिनाथेन अपि पयस्विनीम् इति शब्दस्य अर्थः 'प्रशस्तक्षीराम्' [32] इति उक्तः।

**केसरिणम्** [33]

अयं शब्दः द्वितीयसर्गस्य ऊनत्रिंशत्तमे श्लोके वर्तते । इनिप्रत्ययान्तत्वात् मत्वर्थीयः अयं शब्दः। केसराः सन्ति अस्य, तम् इति च अस्य विग्रहवाक्यम् । केसरशब्दस्य जटा इत्यर्थः। अतः केसरीपदेन जटाधारी सिंहः बोध्यते । केसरशब्दात् 'अत इनिठनौ' [34] इति सूत्रेण इनिप्रत्यये पुंसि द्वितीयैकवचने च केसरिणम् इति रूपं सिध्यते । अत्र द्वेधा अर्थः भवितुम् अर्हति । एकः तावत् अतिशयार्थः, द्वितीयः संसर्गार्थः। सिंहस्य जटाः अतिशयेन वर्तते इति कारणात् सिंहः केसरी इति कथ्यते, तेन केसरशब्दात् इनिप्रत्ययस्य अतिशयार्थत्वं गम्यते । अथवा जटा हि सिंहस्य अवयवम्, तस्मात् अवयवावयविनोः समवायसम्बन्धात् संसर्गार्थत्वमपि इनिप्रत्ययस्य भवति ।

**सानुमतः** [35]

केसरिणम् इति शब्दः यस्मिन् श्लोके पठितः तस्मिन् एव श्लोके सानुमतः इति शब्दः अपि पठितः। अयम् अपि शब्दः मत्वर्थीयः। सानुः विद्यते अस्य इति सानुमान्, तस्य इति सानुमतः। सानुमतः इति शब्दस्य अर्थः 'अद्रेः' [36] इति प्रोक्तः मल्लिनाथेन । सानुशब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' [37] इति सूत्रेण मतुप्प्रत्यये पुंसि षष्ठ्येकवचने च सानुमतः इति रूपं भवति । अस्य श्लोकस्य अन्वयः भवति धनुर्धरः सः पाटलायां गवि तस्थिवांसं केसरिणं सानुमतः धातुमय्याम् अधित्यकायां प्रफुल्लं लोध्रद्रुमम् इव ददर्श इति । अर्थात् गवि स्थितः सिंहः पर्वतस्य उपरि स्थितः लोध्रद्रुमः इव दृश्यते । सानुशब्दस्य कः अर्थः इति चेत् उक्तं शब्दकल्पद्रुमे 'सन्यते सेव्यते मुनिप्रभृतिभिः' इति सानुः, तस्य अर्थः 'पर्वतसमभूभागः' [38] इति । अत्र नित्ययोगे अर्थे संसर्गार्थे

---

[28] अष्टा. 5.2.108

[29] र.व. प्रदक्षिणीकृत्य पयस्विनीम्....द्वारमिवार्थसिद्धेः॥ 2.21

[30] अष्टा. 5.2.121

[31] अष्टा. 4.1.5

[32] र.व. पृ.33

[33] र.व. स पाटलायां गवि....सानुमतः प्रफुल्लम्॥ 2.29

[34] अष्टा. 5.2.115

[35] र.व. स पाटलायां गवि....सानुमतः प्रफुल्लम्॥ 2.29

[36] र.व. पृ.35

[37] अष्टा. 5.2.94

[38] श.क.द्रु. पृ.331

वा मतुप्प्रत्ययः प्रयुक्तः। पर्वते हि सानुः नित्यं वर्तते इति हेतोः नित्ययोगे अर्थे मतुप्प्रत्ययः प्रयुक्तः। अथवा सानुः हि पर्वतस्य अवयवम् अतः अवयवावयविनोः समवायसम्बन्धत्वात् संसर्गार्थे मतुप्प्रत्ययः।

**गिरिशप्रभावात्** [39]

अयं शब्दः द्वितीयसर्गस्य एकचत्वारिंशत्तमे श्लोके पठितः। अस्मिन् शब्दे पठितः गिरिशशब्दः मत्वर्थीयः। गिरिः अस्ति अस्य इति गिरिशः, गिरिशस्य प्रभावात् गिरिशप्रभावात् । गिरिशशब्दस्य अर्थः च प्रोक्तः शब्दकल्पद्रुमे 'गिरिराश्रयत्वेन वसतित्वेनास्त्यस्य' [40] इति । गिरिः इति शब्दस्य च पर्वतः इत्यर्थः। तस्मात् गिरिशब्दात् 'लोमादिपामादिपिच्छादिभ्यः शनेलचः' [41] इति सूत्रेण शप्रत्यये पुंसि षष्ठ्येकवचने गिरिशस्य इति रूपं भवति । अत्र प्रश्नः भवति शकारस्य लोपः लशक्वतद्धिते इति सूत्रेण कथं न भवति । तत्र उच्यते तस्मिन् सूत्रे अतद्धिते इति उक्तम्, अस्य च शप्रत्ययस्य तद्धितसंज्ञकत्वं विद्यते अतः शकारस्य लोपः न । अत्र प्रशंसार्थे शप्रत्ययः प्रयुक्तः। गिरिशपदस्य अर्थः प्रोक्तः मल्लिनाथेन 'ईश्वरस्य' [42] इति। ईश्वरः च प्रशंसार्हः। अतः शप्रत्ययस्य प्रशंसार्थत्वं विद्यते इति वक्तुं शक्यते ।

**स्वस्तिमती** [43]

मत्वर्थीयः अयं शब्दः द्वितीयसर्गस्य अष्टचत्वारिंशत्तमे श्लोके पठितः। स्वस्ति अस्याः अस्ति इति स्वस्तिमती। स्वस्ति इति शब्दस्य क्षेमम् इति अर्थः। अत एव उक्तं मल्लिनाथेन 'स्वस्ति क्षेममस्या अस्ति' [44] इति । स्वस्ति इति शब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' [45] इति सूत्रेण मतुप्प्रत्यये स्त्रीत्वविवक्षायां 'उगितश्च' [46] इति सूत्रेण ङीपि प्रथमैकवचने स्वस्तिमती इति रूपं भवति । अस्य श्लोकस्य अन्वयः भवति तव भूतानुकम्पा चेत् तर्हि त्वदन्ते सति इयम् एका गौः स्वस्तिमती भवेत्, हे प्रजानाथ, जीवन् पुनः पिता इव प्रजाः उपप्लवेभ्यः शश्वत् पासि इति । वचनम् इदं सिंहस्य । दिलीपस्य नाशे सति इयम् एका एव गौः स्वस्तिमती स्यात् परन्तु दिलीपे जीविते सति अन्याः बह्व्यः प्रजाः जीविष्यति इति अस्य श्लोकस्य अर्थः। स्वस्तिमतीशब्दः गौः इति शब्दस्य विशेषणम् । अनेन शब्देन गोः प्रशंसा क्रियते । अतः स्वस्तिशब्दात् मतुप्रत्ययस्य प्रशंसार्थत्वं विद्यते ।

**ऊर्जस्वलम्** [47]

अयं शब्दः द्वितीयसर्गस्य पञ्चाशत्तमे श्लोके वर्तते । सः च वलच्प्रत्ययान्तशब्दः मत्वर्थीयः। ऊर्जः बलम् अस्य अस्ति, तम् इति अस्य पदस्य विग्रहः। ऊर्जस् इति शब्दात् 'ज्योत्स्नातमिस्राश्रृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः' [48] इति सूत्रेण वलच्प्रत्ययस्य निपातने सति द्वितीयैकवचने ऊर्जस्वलम् इति रूपं सिद्ध्यति । अस्य श्लोकस्य अन्वयः भवति तत् कल्याणपरम्पराणां भोक्तारम् ऊर्जस्वलम् आत्मदेहं रक्ष, हि विद्वांसः ऋद्धं राज्यं महीतलस्पर्शनमात्रभिन्नम् ऐन्द्रं पदम् आहुः इति । सिंहस्य वचनम् इदम् । सः दिलीपस्य आत्मनः देहस्य रक्षार्थम् उपदिशति । अनेन अन्वयेन ज्ञायते यत् आत्मदेहम् इति पदस्य विशेषणम् ऊर्जस्वलम् इति । दिलीपस्य देहे अतिशयेन बलम् आसीत् अतः सः ऊर्जस्वलः इति कथ्यते । उक्तं च शब्दकल्पद्रुमे 'अतिशयितः ऊर्जो बलम् अस्य अस्ति' [49] इति ।

---

[39] र.व. इति प्रगल्भं....शिथिलीचकार॥ 2.41

[40] श.क.द्रु. पृ.329

[41] अष्टा. 5.2.100

[42] र.व. पृ.38

[43] र.व. भूतानुकम्पा तव....पितेव पासि॥ 2.48

[44] र.व. पृ.40

[45] अष्टा. 5.2.94

[46] अष्टा. 4.1.6

[47] र.व. तद्रक्ष कल्याणपरम्पराणाम्....राज्यं पदमैन्द्रमाहुः॥ 2.50

[48] अष्टा. 5.2.14

[49] श.क.द्रु. पृ.280

अतः एतत् वक्तुं शक्यते यत् ऊर्जश्शब्दात् अतिशयार्थे वलच्प्रत्ययः प्रयुक्तः कालिदासेन।

**प्रस्नविणीम्** [50]

द्वितीयसर्गस्य एकषष्टितमे श्लोके पठितः प्रस्नविणीम् इति शब्दः। इनिप्रत्ययान्तः प्रस्नविणीम् इति शब्दः मत्वर्थीयः विद्यते। प्रस्नवः अस्याः अस्ति, ताम् इति अस्य पदस्य विग्रहवाक्यम्। प्रस्नवशब्दस्य क्षीरस्नावः इति अर्थः। प्रस्नवशब्दात् 'अत इनिठनौ' [51] इति सूत्रेण इनिप्रत्यये, स्त्रीत्वविवक्षायां 'ऋन्नेभ्यो ङीप्' [52] इति सूत्रेण ङीपि द्वितीयैकवचने प्रस्नविणीम् इति रूपं भवति। अस्य श्लोकस्य अन्वयः भवति राजा अमृतायमानं वत्स, उत्तिष्ठ इति उत्थितं वचः निशम्य उत्थितः सन् अग्रतः प्रस्नविणीं गां स्वां जननीमिव ददर्श, सिंहं न इति। गोः वचनम् इदम्। दिलीपः नन्दिन्याः रक्षां कृतवान् ततः सा धेनुः वत्स, उत्तिष्ठ इति दिलीपं वक्ति। दिलीपः तां धेनुम् प्रस्नविणीं जननीम् इव दृष्टवान् सिंहं तु न दृष्टवान् इत्यर्थः। प्रस्नविणीम् इति पदं गोः विशेषणम्। प्रस्नविणीपदेन गोः प्रशंसा क्रियते। प्रशस्तः प्रस्नवः क्षीरस्नावः अस्याः अस्ति इति कारणात् सा प्रस्नविणी इति कथ्यते। एतेन वक्तुं शक्यते यत् प्रस्नवशब्दात् इनिप्रत्ययः प्रशंसार्थे प्रयुक्तः।

**वत्सलः** [53]

अयम् अपि शब्दः मत्वर्थीयः। अयं शब्दः रघुवंशस्य द्वितीयसर्गस्य ऊनसप्ततितमे श्लोके पठितः। वत्सः अस्य अस्ति इति अस्य पदस्य विग्रहः। वत्सशब्दात् 'वत्सांसाभ्यां कामबले' [54] इति सूत्रेण लच्प्रत्यये पुंसि प्रथमैकवचने वत्सलः इति रूपं सिध्यति। वत्सलशब्दस्य अर्थः प्रोक्तः मल्लिनाथेन 'प्रेमवान्' [55] इति। अत्र वत्सशब्दस्य च कामार्थः विद्यते अत एव तेन सूत्रेण लच्प्रत्ययः अभूत्। अस्य श्लोकस्य अन्वयः भवति अनिन्दितात्मा वत्सलः वसिष्ठेन कृताभ्यनुज्ञः वत्सहुतावशेषं नन्दिनीस्तन्यं शुभ्रं मूर्तं यशः इव अतितृष्णः सन् पपौ इति। अस्य अर्थः भवति यत् यथा वत्सलः राजा दिलीपः तृष्णार्तः सन् शुभ्रं मूर्तं यशः पिबति तथा वसिष्ठानुमत्या सः नन्दिन्याः क्षीरं पीतवान् इति। राज्ञि दिलीपे हि अतिशयेन प्रेम वर्तते अतः सः वत्सलः इति कथ्यते कालिदासेन। अतः वक्तुं शक्यते यत् अत्र कालिदासेन अतिशयनार्थे वत्सशब्दात् लच्प्रत्ययः प्रयुक्तः।

**उपसंहारः**

मया अस्मिन् ग्रन्थे कालिदासकृतस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे द्वितीयसर्गे च विराजमानानां मत्वर्थीयशब्दानां व्याख्यानं संक्षेपेण कृतम्। एकस्य मत्वर्थीयशब्दस्य एकवारम् एव व्याख्यानं मया कृतम्। आदौ एव प्रोक्तं यत् मत्वादीनां प्रत्ययानां सप्त विशेषार्थाः। ते च भूमा, निन्दा, प्रशंसा, नित्ययोगः, अतिशयनम्, संसर्गः, अस्तिविवक्षा च। एतेषु अर्थेषु एव मत्वादिप्रत्ययानां प्रयोगं कृतवान् कालिदासः। एतद्भिन्नेषु अर्थेषु मत्वादीनां प्रयोगः कालिदासेन कृतः इति मया न दृष्टः। न केवलं रघुवंशस्य प्रथमसर्गे द्वितीयसर्गे च मत्वर्थीयशब्दानां प्रयोगं कृतवान् कालिदासः अपि तु सम्पूर्णे रघुवंशे, कुमारसम्भवादिषु च मत्वर्थीयशब्दान् प्रायौक्षीत् कालिदासः। ते अपि शब्दाः एषु एव अर्थेषु प्रयुक्ताः स्यात् कालिदासेन इति मम मतिः। वस्तुतस्तु मतुबादीनां षड् एव अर्थाः। अस्तिविवक्षारूपः अर्थः मतुबादीनां नास्ति एव। अत एव तत्वबोधिनीकारेण उक्तम् 'अस्तिविवक्षायां ये मतुबादयो विधीयन्ते ते भूमादिषु विषयेषु भवन्तीति' [56] इति।

**सङ्केतसूची**

1. अष्टा.- अष्टाध्यायी
2. र.व.- रघुवंशम्

[50] र.व. उत्तिष्ठ वत्सेत्यमृतायमानम्....प्रस्नविणीं न सिंहम्॥ 2.61

[51] अष्टा. 5.2.115

[52] अष्टा. 4.1.5

[53] र.व. स नन्दिनीस्तन्य....मूर्तमिवातितृष्णः॥ 2.69

[54] अष्टा. 5.2.98

[55] र.व. पृ.46

[56] वै.सि.कौ. पृ.570

3. वै.सि.कौ.- वैयाकरणसिद्धान्तकौमुदी
4. श.क.द्रु.- शब्दकल्पद्रुमः
5. अवलोकितग्रन्थसूची


6. कालिदासः। रघुवंशः। काळे-रामचन्द्रः (सम्पा.)। मुम्बईवैभब । मुम्बई। 1844 (शका.) ।
7. कालिदासः। रघुवंशमहाकाव्यम् । झारामचन्द्रः (सम्पा.)। कृष्णदास अकादमी । वाराणसी । 2002 ।
8. बाहादुर-राधाकान्तदेवः। शब्दकल्पद्रुमः। वसुवरदाप्रसाद-वसुहरिचरणौ (सम्पा.) । चौखम्बा संस्कृत सीरीज आफिस । वाराणसी । 2024 (वि.) ।
9. भट्टोजिदीक्षितः। वैयाकरणसिद्धान्तकौमुदी । शर्मागिरिधर-शर्मापरमेश्वरानन्दौ (सम्पा.) । मोतीलाल-बनारसीदास । मुम्बई । 1940 ।


**अवलोकितजालपुटसूची**


https//www.ashtadhyayi.com/sutraani/